| अथ प्रकीर्णकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ मूल्यदानम्। | दक्षिणा। |
| --- | --- | --- | --- | --- |
| अथ रजकादिस्पर्शः। आदिना चर्म्मारवेणुधीवरनटानां ग्रहणम्। | अनुच्छिष्टस्य द्विजस्य रजकादिभिरकामतः स्पर्शे आचमनम्।<br>कामतः शिरोव्यतिरिक्ताङ्गस्पर्शे तदङ्गप्रक्षालनपूर्व्वकमाचमनम्।<br>शिरःस्पर्शे स्नानम्।<br>उच्छिष्टस्य तु ब्राह्मणस्यानुच्छिष्टचर्म्मकारादिस्पर्शे एकरात्रं पयःपानम्। | | | |
| | उच्छिष्टचर्म्मकारादिकर्त्तृकस्पर्शे त्रिरात्रोपवासान्ते घृतप्राशनम्। ज्ञानत ऊर्द्ध्वोच्छिष्टविषयञ्चेदम्। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | अज्ञानतस्तदर्द्धम्। | ० | ॥।० पणाः। | यथाशक्ति। |
| अथोच्छिष्टस्य ब्राह्मणस्योच्छिष्टसच्छूद्रस्पर्शः। | एकोपवासानन्तरं पञ्चगव्यपानम्।<br>कामत इदम्। | ० | ॥० पणाः। | यथाशक्ति। |
| | अकामेऽधोच्छिष्टे च नक्तम्।<br>शुनः स्पर्शेऽप्येवम्। | ० | २ रजतरक्तिके। | यथाशक्ति। |
| अथोच्छिष्टोच्छिष्टसवर्णस्पर्शः। | द्वयोरेवोच्छिष्टयोर्ब्राह्मणयोरन्योन्यस्पर्शे तदन्नत्यागपूर्व्वकं स्नानम्।<br>अत उच्छिष्टस्य विप्रस्यानुच्छिष्टविप्रस्पर्शे दोषाभाव एव। एतदकामतः। | | | |
| | कामतो नक्तपूर्व्वं घृताशनम्। | ० | २ रजतरक्तिके। | यथाशक्ति। |
| | उच्छिष्टब्राह्मणस्योच्छिष्टक्षत्रस्पर्शे नक्तम्। | ० | २ रजतरक्तिके। | यथाशक्ति। |
| | तादृशवैश्यस्पर्शे उपवासः।<br>भुञ्जानयोः सवर्णयोः परस्परस्पर्शे तदन्नत्यागपूर्व्वकं स्नानं प्राणायामश्च।<br>अज्ञानात्तदन्नभोजने परदिने नक्तं पञ्चगव्यपानम्। तदन्ते भोजने न दोषः। | ० | ॥० पणाः। | यथाशक्ति। |
| | ज्ञानात् उपवासानन्तरं ब्रह्मकूर्च्चपानं हविष्यभोजनञ्च।<br>शूद्रस्यापि विशेषाश्रवणादुच्छिष्टोच्छिष्टसंस्पर्शे एतदेव। नक्ताशक्तौ रजतरक्तिकादयं देयम्। | ० | ॥० पणाः। | यथाशक्ति। |
| अथ नीलीवस्त्रपरिधानम्। | अहोरात्रोपवासानन्तरं पञ्चगव्यपानम्।<br>इदमज्ञाने।<br>ज्ञाने द्वैगुण्यम्। | ० | ॥० पणाः। | यथाशक्ति। |
| | पालनाद्विक्रयात्तद्वृत्तेरुपजीवनात् त्रीणि कृच्छ्राणि।<br>नीलीवस्त्रधारिणां स्नानदानतपोहोमस्वाध्यायपितृतर्पणमहायज्ञानां वृथात्वम्। स्त्रीणां क्रीड़ार्थसंयोगे शयनीये न दोषः। | ३ धेनवः। | ६ कार्षापणाः। | यथाशक्ति। |
| अथ पलाण्डुलशुनादिस्पर्शः। आदिना सुरामद्यशूद्रोच्छिष्टानां ग्रहणम्। | ऊर्द्ध्वोच्छिष्टस्य द्विजस्य कामतः स्पर्शे त्र्यहं कुशजलपानं सावित्रीशतजपश्च। | ० | १॥० कार्षापणलभ्यकाञ्चनम्। | यथाशक्ति। |
| | मूत्रोच्छिष्टस्य स्पर्शे नक्तम्। | ० | २ रजतरक्तिके। | यथाशक्ति। |
| | कृतपुरीषोत्सर्गस्य पलाण्डुलशुनादिस्पर्शे एकोपवासः। | ० | ॥० पणाः। | यथाशक्ति। |
| | ऊर्द्ध्वोच्छिष्टस्य द्व्यहोपवासः।<br>एतत्त्रयमकामतः।<br>अनुच्छिष्टस्य स्पर्शे केवलं स्नानम्। | ० | १ कार्षापणः। | यथाशक्ति। |